क्वैतकिकं, क्ली, (क्वीतकेन यष्टिमधुकया निर्वृत्तं इति ठञ्।) मद्यम्। इति शब्दचन्द्रिका॥ (विवरणमस्य मद्यशब्दे ज्ञातव्यम्॥)

क्लोम, [न्] क्ली, (क्लुङ् गतौ + मनिन्।) फुप्फुसम्। फाँफ़ड़ा इति फुलधरा इति च ख्यातम्। इति भरतः॥ तत्पर्य्यायः। तिलकम् २। इत्यमरः॥ २। ६। ६५॥ क्लोमम् ३ क्रोमम् ४। इति तट्टीका॥

"वाक्षोदर्योर्मध्ये वक्षः तन्मध्ये हृदयं तत्पार्श्वे क्लोम पिपासास्थानम्"। इति वैद्यकम्॥

("उदकवहे द्वे तयोर्मूलं तालु क्लोम च"॥ इति सुश्रुते शारीरस्थाने नवमाध्यायः॥)

क्व, व्य, (कस्मिन्निति "किमोऽत्"। ५। ३। १२। इति अत् ततः "क्वाति"। ७। २। १०५। इति क्वादेशः।) कुत्र। कोथा इति भाषा। इति व्याकरणम्॥ अत्यन्तासम्भावनायां पण्डितैः क्वद्वयं प्रयुज्यते। यथा, रघुः। १। २।

"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः"॥

क्वङ्गुः, पुं, (कु + अगि + उन्।) कङ्गुः। इति हेमचन्द्रः॥

क्वचन, व्य, (पाणिनिमते पदद्वयमेतत्। मुग्धबोधमते तु "किमः त्रयन्ताच्चिचनौ"। इति चनः।) क्वचित्। इति व्याकरणम्॥

क्वचित्, व्य, (पाणिनिमते पदद्वयम्। मुग्धबोधमते तु "किमः त्रयन्ताच्चिचनौ"। इति चित्।) कस्मिंश्चित्। कुत्रचित्। कोनस्थाने इत्यादि भाषा। इति व्याकरणम्॥

(यथा, विष्णुपुराणे १। २२। ३८।

"हन्ति वा यत् क्वचित् किञ्चित् भूतं स्थावरजङ्गमम्"॥)

क्वण, शब्दे। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) वकारयुक्तः। क्वणति वीणा। इति दुर्गादासः॥

क्वणः, पुं, (क्वण् + भावे अप्।) कणकणेति शब्दविशेषः। इत्यमरटीकायां सारसुन्दरी॥ वीणायाः शब्दः अन्यस्य च शब्दः। इति भरतः॥ तत्पर्य्यायः। णिक्वाणः २ निक्वणः ३ क्वाणः ४ क्वणनम् ५। इत्यमरः। १। ७। २४॥

क्वणनं, क्ली, (क्वण् + भावे ल्युट्।) क्वणः। इत्यमरः। १। ७। २४॥

क्वणनः, पुं, (क्वणति इति। क्वण् + ल्युः।) चण्डिकासुतः। इति त्रिकाण्डशेषः॥ छोटहाँड़ी इति भाषा॥

क्वथ, ए ञ निष्पचने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) वकारयुक्तः। ए, अक्वथीत्। ञ, क्वाथः क्वथः। क्वथति वैद्य औषधं निष्पचतीत्यर्थः। इति दुर्गादासः॥

क्वथितः, त्रि, (क्वथ्यते स्म इति। क्वथ + कर्म्मणि क्तः।) अतिपक्वव्यञ्जनदशमूलादिः। तत्पर्य्यायः। निष्पक्वः २। इत्यमरः। ३। १। ६५॥ कषायः ३ निर्य्यूहः ४ क्वाथः ५ शृतः ६। इति वैद्यकपरिभाषा॥

क्वाणः, पुं, (क्वण् + भावे कर्म्मादिवाच्ये च यथायथं घञ्।) क्वणः। इत्यमरः। १। ७। २४॥

(यथा, राजेन्द्रकर्णपूरे १७॥

"सञ्जाते त्वयि हारिहारवलयक्वाणं क्वणत्कङ्कणां पश्यत्काञ्चनकाञ्चि सा भगवती नर्नर्त्ति वाग्देवता"॥)

क्वाथः, पुं, (क्वथ् + भावे घञ्।) दुःखम्। व्यसनम्। द्रव्यनिष्पाकः। इति हेमचन्द्रः॥ क्वाथ्यमानं तोयं त्रिविधम्। पादावशेषम् १ अर्द्धावशेषम् २ त्रिपादावशेषञ्च ३। अस्य नाम पारिभाषिकोष्णोदकम्। तत्र त्रिपादावशेषं वातनाशकम्। अर्द्धावशेषं पित्तनाशकम्। पादावशेषं कफनाशकम्। लघु अग्निवर्द्धकञ्च। तेषां मध्ये त्रिपादावशेषजलं हेमन्ते शिशिरे च प्रशस्तम्। वसन्ते पादावशेषजलं प्रशस्तम्। शरदि ग्रीष्मे च अर्द्धावशेषजलं प्रशस्तम्। वर्षायां अष्टभागावशेषजलं प्रशस्तम्। तत्काले बहुदोषत्वात्। दिनपक्वजलं रात्रौ गुरु रात्रिपक्वजलं दिवा गुरु। इति राजवल्लभः॥ यथास्य करणप्रणाली॥

"पानीयं षोड़शगुणं क्षुस्से द्रव्यपले क्षिपेत्।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम्॥
तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्।
शृतः क्वाथः कषायश्च निर्य्यूहः स निगद्यते"॥

इति शार्ङ्गधरेण मध्यखण्डे द्वितीयाध्याये उक्तम्॥)

क्वाथोद्भवं, क्ली, (क्वाथादुद्भवो यस्य। क्वाथाद् उद्भवतीति वा।) तुत्थाञ्जनम्। इत्यमरः। २। ९। १०२॥

क्वेल, ऋ चाले। गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-गतौ सकं-सेट्।) वकारयुक्तः। ऋ, अचिक्वेलत्। चालः कम्पः। चालः केचिन्न मन्यते। इति दुर्गादासः॥

क्ष, क्षकारः। (अयन्तु ककारषकारयोगेन जातः। अतोऽस्य पृथक् वर्णत्वशङ्का नास्त्येव।) तन्त्रमते तु व्यञ्जनचतुस्त्रिंशवर्णः। अष्टमवर्गीयपञ्चमवर्णः। एकपञ्चाशन्मातृकावर्णानां चरमवर्णश्च। यथा,—

"पञ्चाशल्लिपिभिर्माला विहिता सर्व्वकर्म्मसु।
अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता॥
क्षार्णं मेरु मुखं तत्र कल्पयेन्मुनिसत्तमः।
अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः"॥

इति गौतमीयतन्त्रम्॥ *॥

कण्टदेशोद्भवोऽयम्। यथा,—

श्रीशिव उवाच।

"विशेषं कथयाम्यद्य प्रोच्चार्य्याः कण्ठतः स्वराः।
हृदयं जिह्वया मूर्द्धा हृदयं जिह्वदन्तगम्।
मुखस्थानाञ्चलो वाच्याः क्षकारः कण्ठघातजः"॥

इति वरदातन्त्रे १० पटलः॥ *॥

अस्य स्वरूपं यथा,—

"क्षकारं शृणु चार्व्वङ्गि कुण्डलीत्रयसंयुतम्।
चतुर्व्वर्गमयं वर्णं पञ्चदेवमयं सदा।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा॥
त्रिविन्दुसहितं वर्णमात्मादितत्त्वसंयुतम्।
शरच्चन्द्रप्रतीकाशं हृदि भ ऽ सुन्दरि!"॥

इति कामधेनुतन्त्रम्॥ *॥

अस्याभिधानानि यथा,—

"क्षः क्रोधस्तुम्बुकः कालो रुद्रः सम्वर्त्तकः परः।
नृसिंहो विद्युता माया महातेजा युगान्तकः॥
परात्मा क्रोधसंहारी बलान्तो मेरुवाचकः।
सर्व्वाङ्गः सागरः कामः संयोगान्त्यस्त्रिपूरकः॥
क्षेत्रपालो महाक्षोभो मातृकान्तानलः क्षयः।
मुखं क्षव्यवहानन्ता कालजिह्वा गणेश्वरः।
कायप्रस्तश्च संघातो मलयश्रीर्ललाटकः"॥

इति तन्त्रशास्त्रे वर्णाभिधानम्॥ *॥ अपि च।

"क्षकारो नरसिंहश्च मेरुः सम्वर्त्तकोऽपि च।
तव स्नेहान्मया देवि! कथितं मातृकाक्षरम्।
पर्य्यायैरपि विज्ञेयं न प्रकाश्यं कदाचन"॥

इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥*॥

अस्य ध्यानं यथा,—

"चतुर्भुजां रक्तवर्णां शुक्लाम्बरविभूषिताम्।
रत्नालङ्कारसंयुक्तां वरदां पद्मलोचनाम्॥
ईषद्धास्यमुखीं लोलां रक्तचन्दनचर्च्चिताम्।
शरदाचीश्च चतुर्व्वर्गप्रदां सौम्यां मनोहराम्॥
गन्धर्व्वसिद्धदेवाद्यैर्ध्यातामाद्यां सुरेश्वरीम्।
एवं ध्यात्वा क्षकारन्तु तन्मन्त्रं दशधा जपेत्"॥

इति वर्णोद्धारतन्त्रम्॥ क्षकारस्य ककारषकारयोगजत्वेन केचित् पृथग्वर्णत्वेन न मन्यन्ते। तेषां मते तन्त्रोक्तैकपञ्चाशद्वर्णानुपपत्तिः तन्त्रशास्त्रे तस्य मेरुत्वेन गणनानुपपत्तिश्च भवति। अतः पृथङ्निर्दिश्यते इति केचित्। तथा च।

"यान्ताः स्युर्यद्यपि क्षान्ता वर्णानामनुरोधतः।
पृथक्क्रमेण कथ्यन्ते तथाप्येते समन्वयात्"॥

इति विश्वप्रकाशः॥ अपि च।

"अकारादिलकारान्ता वर्णाः पञ्चाशदीरिताः।
संयोगात् कषयोरेषः क्षकारो मेरुरीरितः"॥

इति कृष्णानन्दधृततन्त्रशास्त्रम्॥

क्षः, पुं, (क्षयति लोकान् युगान्तकाले प्रलये सर्व्वाणि भूतानि महाकालोदरं प्रेरयतीति। क्षि क्षये + ड प्रत्ययः।) सम्बर्त्तः। (क्षिणोति हन्ति मनुष्यादिजीवानिति।) राक्षसः। (क्षिणोति हन्ति हिरण्यकशिप्वाद्यसुरानिति।) नरसिंहः। (क्षयति क्षिणोति वा भूतानि स्वकीयाग्निना इति।) विद्युत्। (क्षयति शस्याद्युत्पत्त्या क्रमशः इति। क्षि + डः।) क्षेत्रम्। क्षेत्रपालः। (क्षि क्षये + भावे डः।) नाशः। इति शुद्धाङ्कितमेदिनी॥

क्षज, इ क तङ्के। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) तङ्को दुःखेन जीवनम्। इ क, क्षञ्जयति दीनः। इति दुर्गादासः॥

क्षज, इ ष म ङ } दानगत्योः। इति कविकल्पद्रुमः॥
क्षज, ष म ङ } (भ्वां-आत्मं-सकं-सेट्।) इ, क्षञ्जते। ष, क्षञ्जा। सेमक्षात् सनोरित्यनेनैवेट्सिद्धौ अस्य षानुबन्धस्वरपर्य्यन्तघटादिभ्यो ङ इति प्राचीनमतानुरोधात्। म, अक्षञ्जि अक्षाञ्जि क्षञ्जं क्षञ्जं क्षाञ्जं क्षाञ्जम्। मानुबन्धबलात् अनुपधाया अपि दीर्घः। समते तु अत्र दीर्घविधिरुपधां नापेक्षते। ङ, क्षञ्जते। ष, क्षजा। म, क्षजयति। ङ, क्षजयते। दा दानम्। इति दुर्गादासः॥

क्षण, द ञ उ वधे। इति कविकल्पद्रुमः। (तनां-उभं-सकं-सेट्।) द ञ, क्षणोति क्षणुते। उ